ISSN: 2456–4397 RNI No.UPBIL/2016/68067 Vol-4* Issue-11* February- 2020
Anthology : The Research

# सह सुपा इति पाणिनीयसूत्राविवेचनम्

**श्री प्रकाश पाण्डेयः**
एसोसिएट प्रोपफेसर,
विश्वविद्यालय संस्कृत विभागः,
बी0आर0ए0 बिहार विश्वविद्यालयः,
मुजफ्रपफरपुरम्, भारत

**सारांश**

सह सुपा सूत्रामिदम् अधिकारसूत्रामस्ति[2]। परिभाषासूत्रामिदमभविष्यच्चेत् अस्य प्रवृत्तिः शास्त्राान्तरेऽपि अभविष्यत् किन्तु तथा न दृश्यते। अधिकृतक्षेत्रो प्रतिसूत्रां सूत्रास्यास्य अन्वितिः भवति। काशिकाकारमते सूत्रामिदं प्रतिसूत्रामनुवर्तते अतः अधिकारसूत्रामेतत्। सूत्रेऽस्मिन् 'सुबामन्त्रिाते पराघ्गवत्स्वरे'[3] इत्यस्मात्सूत्राात् सुपः अनुवृत्तिर्भवति। अनुवृत्तं 'सुप्' पदमपि सूत्रोणानेन सह संयुज्य अधिकारस्य कार्यं कुरुते तदा फ्सुप् सुपा सहत्र सूत्रामध्किाररूपेण क्रियाशीलं तिष्ठति। प्रश्नोऽयमत्रा समुदेति यत् 'सह' पदस्य ग्रहणं किमर्थं कृतं यतो हि महर्षिणा पाणिनिना विना सहपदप्रयोगमपि ''वृद्धो यूना तल्लक्षणश्चेदेव विशेषः''[4] इत्यस्मिन् सूत्रो तृतीयायाः प्रयोगः कृतः अतः 'सुपा' इति तृतीयान्तपदेनानेनैव सहार्थबोधः अभविष्यत्, प्रकृतसूत्रो सहपदस्य ग्रहणं व्यर्थमेवास्ति। प्रश्नस्यास्य उत्तरं महाभाष्यकारः वदति – सहग्रहणं क्रियते सहभूतयोरेव समाससंज्ञा यथा स्यात् एकैकस्य समाससंज्ञा मा भूदिति।'[5] अर्थात् सुबन्तस्य सुबन्तेन सह युगपद् समाससंज्ञा भवेत् न तु पृथक् पृथक्। पाणिनिना 'सह' इत्यस्य योगे तृतीयाविधयकसूत्रां 'सहयुक्तेऽप्रधने'[6] पठितम्। सूत्रास्यास्य उदाहरणे ''पुत्रोण सहागतः पिता'' इत्यत्रा पुत्रापित्राोः उभयोः आगमनक्रियया सम्बन्धः अस्ति। एवमेव प्रत्येकं समाससंज्ञानिवारणहेतोः 'सह' इत्यस्य ग्रहणं कृतं येन सहभूतयोः उभयोः पदयोः एका समाससंज्ञा भवेत्।[7]

वस्तुतः सहग्रहणेन समुदायस्य बोधः भवेत्, एकैकस्य बोधः न स्यात् – सहग्रहणस्य नास्ति प्रयोजनमिदम्। समास इति महती संज्ञा प्राचीनाचार्याणाम् अन्वर्था अस्ति–समसनं समासः अथवा यस्मिन्समुदाये पदद्वयं समस्यते सः समासः। एवं प्रकारेण अन्वर्थसंज्ञाकारणतः सह इत्यस्य आनर्थक्ये सिद्धेमहाभाष्यकारेण पतञजलिना अस्य प्रयोजनं योगविभागः मतः।[8] अनुवृत्तं सुपं स्वीकृत्य ''सुप् सह सुपाय'' सूत्रामिति क्रियते। इदानीं सूत्रास्यास्य योगविभागं कुर्मः। प्रथमे भागे 'सह' इति पदं 'सुपा' इत्यस्मात् पृथक् क्रियते। 'समर्थः पदविधिः'[9] इति परिभाषया समर्थपदस्य सन्निवेशः भवति। तदा प्रथमयोगविभागस्य स्वरूपं भविष्यति – सुप् समर्थेन सह समस्यते। योगविभागोयं सप्रयोजनः इष्टसिद्ध्यर्थकः वा अस्ति। सुप्पदेन स्वादयः एकविंशतिः प्रत्ययाः बोधयन्ते। यत्रा प्रत्ययनिर्देशेन किमपि विधनं स्यात् तत्रा तदन्तस्य ग्रहणं क्रियते।[10] नियमेनानेन सुपः अर्थः सुबन्तं तथा 'सह सुपा' इति सूत्रो सुप्प्रत्ययनिर्देशेन समासस्य विधनं कृतम् अतोऽत्रा 'सुपा' इत्यस्य अर्थः 'सुबन्तेन' अस्ति। प्रथमभागस्य सम्पूर्णः अर्थः भविष्यति यत् सुबन्तपदस्य समर्थेन ;पदेनद्ध सह समासः भवति। अस्य विभागस्य आलोके सुबन्तपदानां तिघन्तपदैः सह समासं कर्तुं स्वतन्त्राता लभ्यते।[11] किन्तु अयं समासः वेदे एव भवति तथा 'वि' सुबन्तं तथा तिघन्तम् 'अचलत्' इत्युभयोः पदयोः समस्ते सति 'व्यचलत्' इति समस्तपदं तिष्ठति। पुनः 'अनु' सुबन्तेन सह 'अनुव्यचलत्' इति समस्तपदं भवति। एवमेव 'प्रावर्षत्' एवं 'अनुप्रावर्षत्' इति समस्तं पदं बोध्यते।

योगविभागे सति द्वितीयसूत्रास्य स्वरूपं भवति – ''सुप् सुपा सह समस्यते'' यस्यार्थः अस्ति यत् सुबन्तपदस्य सुबन्तपदेन सह समासः भवति। अयम् अर्थः लौकिकसंस्कृतस्य समस्यमानपदेषु घटितः भवति। समासे सति 'कृत्तद्धितसमासाश्च'[12] इतिसूत्रोण समस्यमानपदानां प्रातिपदिकसंज्ञा भवति।

प्रकृतसूत्रास्य 'सुप्' 'सह' 'सुपा' चेति त्रायाणां पदानाम् अधिकारः प्रवर्तते। अतः सूत्रास्य दृष्ट्या अयं पदाधिकारः अस्ति। शब्दार्थदृष्ट्या शब्दार्थाधिकारोऽयं यतोहि सूत्रास्यास्य शब्दार्थयोः उभयोः अधिकारः गच्छति। आकारदृष्ट्या अयं लघु–अधिकारः यतोहि अस्य प्रवृत्तिः दूरगामिनी नास्ति।

अस्य अधिकारसूत्रास्य व्याप्ति–अवधेः कुत्रापि निर्देशः नास्ति। 'सुबामन्त्रिाते पराधँवत्स्वरे'[13] इत्यस्मात् सुप्पदस्य 'चार्थे द्वन्द्वः'[14] सूत्रां यावत् अधिकारगतिः अस्ति यतोहि तावत्पर्यन्तं सुपः अन्वितिः प्रयोजनाधीना ज्ञायते अतः एव 'चार्थे द्वन्द्वः' सूत्रापर्यन्तम् अस्य अधिकारः स्वीक्रियते। 'सह सुपा' इत्यस्य सम्बन्धः 'क्त्वा च'[14] सूत्रां यावत् दृश्यते। सुबन्तस्य सुबन्तेन सह समासः भवति – इत्यनेन स्पष्टं यत् द्वयोः सुबन्तयोः एव समासः भवति । अव्ययीभावतत्पुरुषद्विगुकर्मधारयादिसमासेषु प्रायः सुबन्तद्वयमेव परस्परं समस्यमानं भवति किन्तु बहुव्रीहिसमासे त्रायाणां पदानां समासः भवति। अतः 'सह सुपा' इत्यस्य अधिकारः 'शेषो बहुव्रीहिः'[15] इत्यस्मात्पूर्वं पठितं 'क्त्वा च'[16] सूत्रापर्यन्तमेव समीचीनः अस्ति। एवमेव सुपः व्याप्तिसीमा 'चार्थे द्वन्द्वः' सूत्रापर्यन्तं तथा 'सह सुपा' इत्यस्य व्याप्तिसीमा 'क्त्वा च' सूत्रापर्यन्तं मान्या अस्ति। इमे त्रायोऽपि पदाधिकाराः अधिकृतक्षेत्रो गधँाप्रवाहवत् व्याप्ताः भवन्ति, अतः गतिदृष्ट्या गधँाप्रवाहवत् व्याप्तोऽयमस्ति अधिकारः।

प्रकृतसूत्रां विषयदृष्ट्या कीदृशम् अधिकारसूत्राम् अस्तीति ज्ञातुं सूत्रास्य कार्यप(तिः विचारणीया। सूत्रामिदं समासशास्त्रो विशेषनियमं द्योतयति यत् सुबन्तेन सह सुबन्तपदमेव समस्यमानं भवेत् अतः प्रकृतम् अधिकारसूत्रां विषयदृष्ट्या नियमाधिकारः ज्ञायते। अतः सूत्रामिदं नियममुखेन अधिकारसूत्राम् अस्ति। नियमनस्य प्रकारद्वयं दृश्यते – विधनात्मकं निषेधत्मकं च। ''आकडारादेका संज्ञा'[17] विधनात्मकं नियमाधिकारसूत्राम् अस्ति। 'पदान्तस्य'[18] निषेधत्मकम् अधिकारसूत्राम् अस्ति। 'सह सुपा' इति सूत्राम् अधिकारेण सह लक्षणमपि अस्ति यतोहि महाभाष्यकारस्य पतञजलेः वचनमस्ति यत् यस्य समासस्य किमपि लक्षणं नास्ति इदं तस्य लक्षणं भविष्यति – ''यस्य समासस्यान्यल्लक्षणं नास्ति इदं तस्य लक्षणं भविष्यति, ''[19] इति।

**सन्दर्भ :**


1. पाणिनीयसूत्राम् – 2.1.4
2. अधिकारश्च लक्षणं च – महाभाष्य–2.1.4
3. पाणिनीयसूत्राम् – 2.1.2
4. पाणिनीयसूत्राम् – 1.2.65
5. महाभाष्यम् –2.1.4
6. पाणिनीयसूत्राम्–2.3.19
7. ''यथा पुत्रोण सहागतः इति द्वयोरपि पितापुत्रायोरागमनेन सम्बन्धः। एवं समाससंज्ञापि प्रत्येकं स्यात्। सहग्रहणे तु एका समाससंज्ञा सहभूतयोर्भवति। – प्रदीपः 2.1.4
8. [1]तस्यैतत्प्रयोजनम्– योगाधँ यथा विज्ञायेत् सति योगाधँ योगविभागः करिष्यते सह। – महाभाष्यम् – 2.1.4
9. पाणिनीयसूत्राम् – 2.1.1
10. प्रत्ययग्रहणे तदन्तग्रहणम्।
11. सह ग्रहणं योगविभागार्थम्, तिघापि सह यथा स्यात् अनुव्यचलत्, अनुप्रावर्षत्।
    – काशिका–2.1.4
12. पाणिनीयसूत्राम – 1.2.46
13. तदेव – 2.1.2
14. तदेव – 2.2.29
15. तदेव – 2.2.22
16. तदेव – 2.2.23
17. तदेव – 2.2.22
18. पाणिनीयसूत्राम् – 1.4.1
19. तदेव – 8.4.37
20. महाभाष्यम् – 2.1.4